राँचीविश्वविद्यालयस्य पीएच० डी० (संस्कृतम्) उपाधिप्राप्तये प्रस्तावितं शोधप्रारूपम्

(मानविकी संकायः)

स्नातकोत्तर-संस्कृतविभागः राँचीविश्वविद्यालयः, राँची

गृहीणां मोक्षार्थम् उपनिषदां भूमिका

शोधनिर्देशिका

डॉ० सविता उराँव
सहायक-प्राध्यापिका,
महिला महाविद्यालयः, राँची

शोधार्थी

स्वपन सिं
स्नातकोत्तर संस्कृत विभाग
राँचीविश्वविद्यालयः, राँची

गृहीणां मोक्षार्थम् उपनिषदां भूमिका

नामः स्वपन सिं

ईमेल:-swapansing89@gmail.com

दूरभाषसङ्ख्याः ६२९७६२५६७१/८९७२८९३२७८

भूमिका-

प्राचीने काले ऋषयः जीवजगद्विषये चिन्तयन्ति स्म। ते सर्वदा विश्वस्य उन्नतेः कृते कार्यं कुर्वन्ति स्म। ते मनुष्याणां वास्तविकं स्वरूपं प्रकटितवन्तः। मूलतः जीवस्य जगतः च परमसत्यं ज्ञात्वा ते नानाप्रकारान् मार्गान् सूचितवन्तः यत्र मनुष्यस्य हिताय मनुष्यः स्वस्य आन्तरिकं तत्त्वं ज्ञातुं शक्नोति।

जनाः आत्मचिन्ताविषये प्रायः विस्मृतवन्तः। जनाः सर्वदा सुखस्य विषये चिन्तयन्ति। अस्य चिन्तायाः अन्तं नास्ति यतः जनानां अभिलाषाः कदापि न पूरिताः भविष्यन्ति। यद्यपि विविधाः उपनिषदः सन्यासीनां मुक्तेः विषये वदन्ति तथापि उपनिषदः साधकानां गृहीनाञ्च मुक्तेः विषये अपि वदन्ति। गृही द्वौ प्रकारौ स्तः-साधकः उदासीनश्च। उदासीनगृही तस्य पत्नीं कुटुम्बं च परित्यज्य सन्न्यासं गृह्णाति। परन्तु साधकगृही गृहे एव निवसति। सः गृहकार्यं करोति।

तस्य स्वकीयानि शास्त्रविहितकर्माणि शुभकर्मरूपेण लभ्यन्ते। तेन शुभकर्मणा तस्य चित्तशुद्धिः भवति। एतद्भावेन साधकगृही सन्न्यासग्रहणं न कृत्वाऽपि सर्वदा संसारे सुखानुभूतैः कामेन इच्छया त्यागेन लोभेन इत्यादिभिः अनुभूतैः सह तिष्ठति। एतादृशं कृत्यकर्म निष्कामकर्म भवति। अस्मिन् निष्काम-कर्मणा तस्य अन्तर्निहितः देवत्वम् आत्म-चेतना च उत्पद्यत्येते। ततः तस्य अहं-चेतना विनष्टा भवति तथा च ब्रह्म- चेतना जागृता भवति। अर्थात् सः मुक्तिं लभते। अतः मुक्तये साधकगृहीणः अस्मिन् संसारे शास्त्रविहितकर्तव्यकर्माणि आवश्यकानि भवन्ति। अतः ईशोपनिषदि उच्यते- कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।

एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।।[1]

एतद् उपनिषत्सु गृहीनां मुक्तिविषये बहूधा आलोच्यन्ते ऋषिभिः। उपनिषद् एकं विज्ञानं अस्ति यस्य विषयः संसारबन्धनात् मुक्तिः इति। इत्थमेव ज्ञानेन मनुष्याः आत्मज्ञानं लप्स्यन्ति। आलोच्ये शोधप्रवन्धेऽस्मिन् उपनिषद्दिशा गृहीनां मुक्तेरूपायः आलोच्यते। उपनिषदां भूमिका - गृहीनां मोक्षार्थं उपनिषदानां भूमिका।

अयम् शोधप्रबन्धः अध्यायपञ्चकेन विभज्यते। प्रथमोऽध्यायवियषस्तावत् उपनिषदां परिचयज्ञापनम्।द्वितीयश्च मुक्तिविषयकपर्यालोचना। तृतीयश्च उपनिष्तसु वर्णिताः मुक्तिविषयकः धारणा। चतुर्थश्चगृहस्थानां मुक्तेरुपायवर्णना।पञ्चमोऽध्यायश्च मुक्तिविषयकाः समीक्षा।

१. शौनकः

२. सत्यकामजावालः

३. नचिकेता

४. रामकृष्णः

५. स्वामिविवेकानन्दः

मुक्तिविषयकाः समीक्षा

मुक्त्याः अधिकारी।

मुक्तिविषयकाः ग्रन्थाः।

गवेषणायाः प्रयोजनम् –

---

[1]'ईशोपनिषद् मन्त्र- पृ. १७

१. विविधशास्त्रेषु सर्वश्रेष्ठत्वात् मुक्तिविषये ज्ञानलाभः अत्यावश्यकः। परन्तु दुरूहभाषया विरचितात् अल्पबुद्धिसम्पन्नपाठकानां ज्ञानार्जने प्रतिबन्धकता जायते। अतः ते ग्रन्थपाठविमुखाः सन्ति। अपि च ग्रन्थस्यास्य भाष्यग्रन्थेषु भाषाकाठिन्यं परिलक्ष्यते। शोधप्रबन्धेऽस्मिन् यतः विविध उपनिषदां, गीतायां इत्यादिना समीक्षणात्मकविश्लेषणं क्रियते, तेन तुलनात्मकसरलभाषया तेषां विश्लेषणं भवति, अनेन तु पाठकाः उपकृताः भवेयुः इति मन्ये।

२. एषां ग्रन्थानां ये तावत् विविधग्रन्थाः सन्ति, ते तु विविधस्थलेषु प्राप्यन्ते, अतः तेषां संग्रहकार्य कष्टसाध्यं कालसापेक्षं च। शोधप्रबन्धेऽस्मिन् यतः संगृहीतग्रन्थानाम् एकत्र समीक्षणं क्रियते, तेन पाठकाः स्वल्पायासेन तान् पठित्वा ज्ञानं लब्धुं शक्नुयुः इति।

३. विविधग्रन्थानां वैमत्यात् पठनकाले पाठकानां मनसि संशयो जायते यत् कस्य मतस्य ग्रहणं भवेत्, कस्य न अथवा कः समीचीनः कः असमीचीनः वा। शोधप्रबन्धेऽस्मिन् यतः समुचितस्य वचनस्य ग्रहणे, असमुचितस्य परित्यजने युक्तिः प्रदीयते, अतः प्रबन्धोऽयं पाठकानां संशयहहारको भवेदिति।

प्रथमोऽध्यायः –

उपनिषदां उद्भवः विकाशश्च-'विद्यते अनेन इति वेदः वस्तुतः ज्ञानार्थकः विद् धातोः घञ् अच् वा प्रत्यययोगेन वेदः इति पदं निष्पद्यते। विद् धातोः चतुर्विधः अर्थः भवति। सत्तार्थः लाभार्थः विचरणार्थः ज्ञानार्थश्च। तत्र ज्ञानार्थकात् विद् धातोः यः अर्थः निष्पद्यते तस्य अर्थः ज्ञानम् इति। इदं ज्ञानं तु परमज्ञानं श्रेष्ठज्ञानं वा। अतः अनेन वक्तुं शक्यते, येन शास्त्रेण दिव्यज्ञानं प्राप्तुं शक्यते तत् वेदमस्ति। सायणाचार्येण उक्तम्-

"इष्टप्राप्ति अनिष्टपरिहारयोऽलौकिकमुपायं य ग्रन्थ वेदयति स वेदः।"

वेदस्य स्वरूपविषये विविधानि मतानि प्राप्यन्ते। आपस्तम्बेन उक्तम्- **"मन्त्रब्राह्मणयोर्वेदनामधेयम्"**। आचार्यः मनुः मते- **"वेदोऽखिलधर्ममूलम्"**। याज्यवल्क्येनऽप्युक्तम्-

"प्रत्यक्षेनानुमित्या योऽस्तूपायो न विद्यते ।

एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता"।।[2]

वेदानां अन्यानि नामानि सन्ति यथा- श्रुतिः छन्दस् निगम् त्रयी इत्यादीनि। मन्त्रस्य वैशिष्टानुसारेण व्यासदेवेन वेदस्य विभागः चतुष्टकम् स्वीकृतम्। यथा ऋग्वेदः सामवेदः यजुर्वेदः अथर्ववेदश्च। पूर्वमीमांसाकारः जैमिनिना उक्तम्-

तेषां ऋक यत्र अथर्वशेन पादव्यवस्थाः।

गीतिषु सामाख्या शेषे यजुशब्दः ।।[3]

तेषां प्रत्येकेषां चतुर्धा विभागो भवति। मन्त्रः ब्राह्मणः आरण्यकम् उपनिषद् च। मन्त्रभागस्य नाम संहिता इति। ब्राह्मणभागे मन्त्राणां प्रयोगविषये आलोचना वर्तते। अरण्ये उपासनाद्धारा लब्धं ज्ञानम् आरण्यकम् इति। अपि च वेदानां अन्तिमः भागः उपनिषद् इति। यस्य प्रमुखः विषयः ब्रह्मविद्या अस्ति।

विकाशः-

वेदस्य अन्तभागम् उपनिषद् इति। अतः उपनिषदः अपरं नाम वेदान्तः अस्ति। वेदस्य अन्त इति वेदान्तः। यस्य ज्ञानेन मुमुक्षव्यक्तिः ब्रह्मज्ञानं लभते तत् विद्यायाः नाम उपनिषद् इति। उपनिषदः इति उप पूर्वकात् नि पूर्वकात् सद् धातोः उत्तरं क्किप् प्रत्ययेन निष्पन्नाः भवति। उपः शब्दस्य अर्थः समीपस्थः। नि उपसर्गस्य अर्थः निश्चयः तथा च सद् धातोः अर्थः विनाशः इति।

[2]याज्ञवल्क्यसंहिता
[3]जैमिनि

अतः उपनिषद् शब्दस्य व्युत्पत्तिलब्धः अर्थः भवति या विद्या संसारस्य बन्धनस्य नाशं करोति या विद्या अस्माभिः सह आत्मनः तादात्म्यं प्रकटयति, यद्विद्यायाः ग्रहणात् संसारस्य दुःखं वा मोहं विनश्यति सा निश्चयेन उपनिषद् इति कथ्यते। पुनः उपनिषदः अपरं नाम रहस्यविद्या अस्ति। यतः एतत् ज्ञानं साधारणसकाशे दुर्लभं अस्ति। आत्मज्ञानं विना एतज्ज्ञाने सरलतया प्रविष्टुं न शक्यते अतः तत् रहस्यविद्या इति कथ्यते।

उपनिषदाम् रचनाकालानि प्रायशः आनुमानिकः। निश्चितरूपे निर्णेतुं न शक्यते। रचनाकालस्य विषये विद्वांसानां मतानैक्यं विद्यते। अतः सम्यकतया न निर्धारयितुं न शक्यते।

संख्यागततया अस्माभिः बहुविधाः उपनिषद्ग्रन्थाः प्राप्यन्ते। मुक्तिकोपनिषदि अष्टाधिकशतः उपनिषद्ग्रन्थाः उल्लिखिताः। डा. राधाकृष्णस्य मतेन द्विशतं उपनिषदां नामानि प्राप्यन्ते। 'ईशादिविंशोत्तरशतोपनिषदः' इति संस्करणे विंशत्याधिकैशतं उपनिषद्ग्रन्थाः उल्लिख्यन्ते। पण्डिद्भिः प्रामाण्योपनिषद् ग्रन्थरूपेण द्वादशविधाः उपनिषद् स्वीकृता। यथा- ईशोपनिषद् केनोपनिषद् कठोपनिषद् प्रश्नोपनिषद् मुण्डकोपनिषद् माण्डुक्योपनिषद् तैत्तिरीयोपनिषद् ऐतेरेयोपनिषद् छान्दोग्योपनिषद् वृहदारण्यकोपनिषद् कौषितकोपनिषद् श्वेताश्वतरोपनिषद् च। परन्तु भाष्यकारः शङ्कराचार्यः दश उपनिषदां भाष्यम् विरचितवान्।

द्वितीयोऽध्यायः-मुक्तिविषयकपर्यालोचना–

१. वेदान्तदर्शने पर्यालोचना

२. ब्रह्मसूत्रे पर्यालोचना

<u>श्रीमद्भागवत्गीतायाम् पर्यालोचना-</u>

गीता भारतवर्षस्य तथा विश्वस्य महान् धार्मिकग्रन्थः अस्ति। पृथिव्यां षट्त्रिंशद्भाषासु गीतायाः संस्करणानि सन्ति। अनेकेषु पाश्चात्यभाषासु अस्य अनुवादोऽपि दृश्यते। गीता सर्वेषां शास्त्राणां सारम् अस्ति।

भगवान् कृष्णः स्वस्य भगवद्गीतायाम् कर्मणा, ज्ञानेन, भक्तिना, राजयोगेन च मुक्तेः विषये कथयति। भगवतः उपदेशः सर्वदा अनासक्तं कार्यं कर्तुं प्रेययति, मनुष्यः केवलं अनासक्तं कर्तव्यकार्यं कृत्वा एव सर्वोच्चस्थानं मोक्षं च प्राप्नुयात्। उच्यते-

तस्मादसक्त सततं कार्यं कर्म समाचर।

असक्तो ह्यचरण कर्म परमाप्नोति परुषः ।। [4]

ज्ञानेनऽपि मोक्षं प्राप्नुयात्। मोहावद्धः योगीव्यक्तिः एतत् संसारं परित्यज्य ज्ञानस्य अनुसरणं करोति। सः इन्द्रियान् जित्वा आत्मज्ञानं च प्राप्नुयात्। अतः भगवद्गीतायां कृष्णेन उवाच –

ये त्वक्षरमनिदेश्यमव्यक्तं पयुपासते

सर्वत्रगमचिन्त्यञ्च कुठस्थसचलं ध्रुवम् ।।[5]

संनियम्येन्द्रियग्रामं सर्वत्र समवुद्धयः

ते प्रप्नवन्ति मामेव सर्वभूतहिते वताः ।।[6]

भक्तिः प्रसङ्गे श्रीमद्भागवत्गीतायां उक्तम्-

अन्या जनाः भक्तिना माम जानन्ति ।

माम् अवलोकते मयि प्रविशन्ति ।।

भक्तिद्वारा साधकगृही परमात्मनः अन्तर्निहितं सगुणत्वं निर्गुणत्वं च ब्रह्मणः स्वरूपविषये जानाति। ततः भगवतः चैतन्ये प्रविशति मनुष्यः मोक्षं च प्राप्नुयात्।

भक्तया त्वनन्यया शकय अहमेवं विधोऽर्जुनः ।

---

[4]गीता ३.९९

[5]गीता. १२/३

[6]गीता१२/४

ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपः ।।[7]

योग-अभ्यासस्य सन्दर्भ भगवान् श्रीकृष्णः कथयति यत् ये इन्द्रियान् नियन्त्रयितुं शक्नुवन्ति, ये भयम्, क्रोधं, लोभं इत्यादीन् च परित्यज्यन्ति ते एव मुक्तिं प्राप्स्यन्ति।

<u>दर्शने पर्यालोचना</u>

चार्वाकदर्शनं व्यतीतेषु सर्वेषु भारतीयदर्शनशास्त्रेषु मुक्तेः विषये चर्चाः सन्ति। जैनदर्शनशास्त्रे जीव- पुद्गलयोः मधये बन्धनमस्ति। अतः पुदगलस्य वियोगेनैव मुक्तिः भवति। पुद्गलस्य संयोगेन अचेतनता भवति। पुदगलवियोगार्थं त्रिरत्नम् आचरणीयम्। त्रिरत्नः भवति सम्यकज्ञानं सम्यकदनं सम्यकचरित्रं च।

बौद्धदर्शने-

बौद्धदर्शने मुक्तिः निर्वाण इति नाम्ना प्रसिद्धा अस्ति। अविद्या हि दुःखस्य कारणम् अस्ति। अविद्यायाः विनाशेन दुःखस्य विनाशो भवति। ततः निर्वाणलाभो भवति।

सांख्ययोगदर्शने-

सांख्ययोगमतेन आत्मनः मुक्तिः नास्ति। आत्मा शुद्धः, स्वतन्त्रः, अन्तःस्थः च अस्ति। अविवेकवशात् जनाः आत्मनः स्वभावं विस्मरन्ति येन च तेषां बन्धनं भवति। मनुष्यः विवेकेन खलु तस्मात् बन्धनात् मुक्तः भवति। तदा आत्मनः प्रकृतिपुरुषयोः भेदो नास्ति। इदं ज्ञानं विवेकज्ञानं भवति। विवेकज्ञानवशात् आत्मा तथा पुरूषः स्वस्वरूपे अवस्थानं करोति। स्वस्वरूपं ज्ञात्वा स्वस्वरूपमवस्थानेनैव पुरुषस्य मुक्तिः भवति। सांख्ययोगानुसारं मुक्तिः द्विविधो भवति। जीवनमुक्तिः विदेहमुक्तिः च। तयोर्मध्ये विदेहमुक्तिः यथार्थम् अस्ति।

---

[7]गीता ११/५४

न्याय-वैशेषिकदर्शने-

न्याय-वैशेषिक-दर्शने मुक्तिः अपवर्गः अथवा निश्रेयः इति कथ्यते। प्रमेयादिनां द्वादशतत्त्वानां ज्ञानेन मुक्तिः सम्भवति। श्रवणमनननिदिध्यासनैः सैद्धान्तिकं ज्ञानं प्राप्यते। तत्त्वज्ञानेन आत्मानुभूतिः तथा मुक्तिः च भवति। मीमांसकगणाः त्रिवर्गं स्वीक्रियन्ते। त्रिषु वर्गेषु मोक्षः परमपुरुषार्थः भवति। तेषां मतेन स्वर्गलाभः एव परमपुरुषार्थः अस्ति। वेदादिशास्त्रविहितकर्मणां माध्यमेन स्वर्गः प्राप्यते।

वेदान्ते-

वेदान्तः द्वौ प्रकारौ स्तः। अद्वैतवेदान्तः द्वैतवेदान्तः च। शङ्कराचार्यः अद्वैतवेदान्तस्य संस्थापकः अस्ति। शङ्कराचार्यस्य मतेन जीवैव ब्रह्मः अस्ति। जीवात्मा एव परमात्मा भवति। रामानुजः द्वैतवेदान्तस्य प्रस्थापकः अस्ति। सः अवदत् जीवात्मा परमात्मतः च भिन्नः इति। जीवात्मा अल्पज्ञः परमात्मा च सर्वज्ञः अस्ति तथा च परमात्मा एव परमपुरुषार्थः भवति। जीवात्मनः मुक्तिः ईश्वरस्य प्राप्तिद्वारा भवति।

सर्वे बन्धनरहिताः जनाः मुक्तिकामिनः भवन्ति। यदा तन्मुक्तिं जीवद्दशायां प्राप्नोति पुरुषः तदा सा मुक्तिः जीवनमुक्तिः इति कथ्यते। बन्धनस्य अर्थः अभिमानादौ निमग्नता। तथा च मुक्तेः अर्थः अस्ति जीवजगतः सर्वैव ब्रह्म इत्यनुभवः। केवलं यदा जीवः अचेतनात् मुक्तः भवति तदैव जीवः ब्रह्मणा सह एकात्मिभूतो भवति।

अस्यां अवस्थायां सर्वेषाम् इन्द्रियानां लोपः दृश्यते। तस्य कर्मफलादिभिः सः स्पृष्टो न भवति। तदा जीवः केवलं जनानां कल्याणे एव आत्मानं समर्पयति। तस्य किमपि कामना-वासनादिकं न स्यात्। इदं मुक्तिः इति कथ्यते।

तृतीयोऽध्यायः-

उपनिषत्सु वर्णिताः मुक्तिविषयकधारणाः–

ईशोपनिषदि धारणा –

ये मनुष्याः आत्मानुसन्धानं न जानन्ति तेषां मनुष्याणां नित्यनैमित्तिकोपासनादि अवश्यमेव कर्तव्यं। यया तेषां भक्तिभावः जाग्रतः भवेत्। तदुपायं विना न कोऽपि उपायः अस्ति येन जीवानां मुक्तिः भवति। अतः उच्यते-

कुर्वन्नेह कर्मानि जिजीविषेच्छतं समा।

एवं त्वयि नान्यथेतोऽस्ति न कर्म्म लिप्यते नरे।।[8]

अनेन प्रकारेण गृहीणां तथा जीवानां दैवीभावः जागर्त्ति। ततः शास्त्रविहितकर्मणां माध्यमेन जीवः मृत्युं अतिक्रम्य मुक्तिं प्राप्नोति। ईशोपनिषदि एकादशतममन्त्रे उच्यते-

विद्याञ्चाविद्याञ्च यस्तद्वेदोभयं सह।

अविद्यया मृत्युं तीर्ध्वा विद्ययामृतमश्नते।।[9]

केनोपनिषदि धारणा-

अस्मिन् जीवने यदि ब्रह्मज्ञानं न लभते तर्हि जीवनस्य सफलता नास्ति। ये ब्रह्मज्ञानाय असमर्थाः ते अस्मिन् जन्ममृत्युचक्रे वारंवारम् आवर्तिता भवन्ति। परन्तु कर्तव्यनिष्ठाः जनाः ब्रह्मज्ञानं प्राप्य अनन्तकालं यावत् अज्ञानस्य जगतः मुक्ताः भवन्ति।

इह चेदवेदीदथ सत्यमस्ति न चेदिहावदीन्महती विनष्टः ।

मुतेषु भुतेषु विचित्य धीराः प्रत्ययास्माल्लीकादमृता भवन्ति ।।[10]

---

[8]ईशोपनिषद् मन्त्र-२

[9]ईशोपनिषद् मन्त्र-११

अतः यः ब्रह्मविद्यां ज्ञातुं शक्नोति सः भ्रमसंसारात् सर्वमहत्तरसुखस्वरूपब्रह्मणि लीनो भवति। अतः चतुर्थखण्डस्य नवमतममन्त्रे उच्यते-

यो वा एतामेवं वेदापहत्य पाप्मानसन्ते स्वर्गे-

लोके ज्यय प्रतितिष्ठति प्रतिनिष्ठति ।[11]

कठोपनिषदि धारणा-

अविवेकवशात् अहंबोधः जाग्रितः भवति अतः ते जनाः सर्वदा संसारचक्रे आवर्त्तिता भवन्ति। तस्य कापि गतिर्नास्ति।

यस्त्वविज्ञानवान भवत्यसनस्कः सदाऽशुचिः ।

न स तत्परमाप्नोति संसारं चाधि गच्छति ।।[12]

परन्तु विवेकवन्तः जनाः संयतमनसः माध्यमेन सदा निर्मलचिन्तया मुक्तिं प्राप्नुवन्ति सः ब्रह्मणः परमास्पदं लभते तस्य पुनर्जन्म भवितुं न अर्हति।

यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः।

स तु तत् परमाप्नोति यस्मादभूयोः न जायते ।।[13]

प्रश्नोपनिषदि धारणा-

याः स्त्रीयाः सन्तानकामनाय प्रजापतिव्रतं कुर्वन्ति अर्थात् अमूत्रलोकभोगाय शास्त्रविहितानि कर्माणि कुर्वन्ति ताः अस्मिन् संसारे निश्चितरूपेण प्रजावृद्धिं कुर्वन्ति। परन्तु याः स्त्रीयाः तेभ्यः भिन्नाः सन्तिः याः ब्रह्मचर्यपालनं कुर्वन्ति तासां जीवनं सर्वदा सत्यस्वरूपे विराजमानं भवति।

---

[10]केनो. मन्त्र-२/५

[11]केनो. मन्त्र-४/९

[12]कठो. मन्त्र-२/३/७

[13]कठो, मन्त्र-२/१/८

तेषां हृदये सदा सत्यस्वरूपः परमेश्वरः तिष्ठति। यस्य मनसि कुकामना नास्ति य कदापि असत्यम् न वदति, य सर्वदा सम्यक् आचरयति यस्य क्रोधः द्वेषः ईर्ष्या इत्यादयः न भवन्ति, स एव ब्रह्मलोकम् आप्नोति।

मुण्डकोपनिषदि धारणा –

मुण्डकोपनिषदः प्रथमखण्डे उच्यते ब्रह्म मननात्मकेन ज्ञानेन प्रकटितो भवति। ततोपचितं ब्रह्मतः अन्नम् अन्नात् प्राणं प्राणात् मनः अन्तरात् सत्यम् अर्थात् पञ्चभूतं पञ्चभूतात् लोकसमूहाणां लोकसमूहात् कर्मणि एवञ्च कर्मणः कर्मफलं जायते ।

अतः उच्यते-

तपसा चीयते ब्रह्म ततोऽन्नमभिजायते।

अन्नात् प्राणो मनः सत्यं लोकाः कर्मसु चामृतम्।।

संयतेन्द्रियाः ज्ञानवन्तः गृहिणः स्वाश्रमविहितकर्मानुष्ठानं कुर्वन्ति । ते पापपूण्यक्षयं कृत्वा उत्तरायणमार्ग लभन्ते। अतः उच्यते-

स पुरुषो ह्यव्यमात्मा....।

श्वेताश्वतरोपनिषदि धारणा –

ईश्वरः चेतनः सर्वव्यापी च अस्ति। सः एव सर्वेभ्यः जीवात्मनेभ्यः कर्मफलं प्रददाति। मुण्डकोपनिषद् कथयति यत् एनं भगवन्तं प्राप्तुं द्वौ मार्गौ स्तः इति। एकः ज्ञानमार्गः अपरश्च कर्ममार्गः। भक्तिमार्गः उभयौ आश्रयतः। एतस्मात् कारणात् भक्तिमार्गं पृथकरूपेण न वर्णयति। एतेन ज्ञानयोगेन कर्मयोगेन च मनुष्याः परमेश्वरं ज्ञात्वा सर्वस्मात् बन्धनात् मुक्तिं लभन्ते। यः मनुष्यः परमेश्वरं लब्धः वा सः कदापि जन्ममृत्युचक्रे आबद्धः न भवति। अतः कस्यापि ज्ञानयोगस्य अथवा कर्मयोगस्य आश्रयं स्वीकृत्य साधनामार्गे गन्तव्यमिति खलु प्रत्येकस्य मानवस्य कर्तव्यं भवेत्। अतः श्वेताश्वतरोपनिषदि उच्यते-

ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः

तस्याभिध्यानात् तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः ।।

बृहदारण्यकोपनिषदि धारणा –

साधारणतः जनाः कामनया वशीभूताः आसन्। मनुष्यानां जीवने धर्मः अर्थः कामश्च एतत्त्रिविधस्य पुरूषार्थस्य प्रभावः दृश्यते। केचन जनाः एतेषि त्रिविषयेषु असन्तुष्टाः सन्ति। यतो हि त्रिगुणात्मकः पुरुषः दुःखात् पूर्णतया मुक्तः भवितुं न शक्नोति । बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणे उच्यते यत्, यदा मनुष्यस्य हृदयस्य अभिलाषाः पूर्णतया नष्टाः भवन्ति, तदा मनुष्यः मृत्युं जयितुं शक्नोति इति।

चतुर्थोऽध्यायः-

गृहस्थानां मुक्तेरुपायवर्णना-

मुमुक्षु राजा जनकः –

गार्हस्थस्य भोगीव्यक्तिनः केनापि मुक्तिः न भवति। ऋषिः नित्यस्य अनित्यस्य च ज्ञानं सर्वदा अपेक्षते। एतादृशः राजाजनकः सर्वेषु लौकिकालौकिकविषयेषु अनासक्तः आसीत्। सः निरन्तरं भूतकालस्य वर्तमानकालस्य च मध्ये गच्छन् आसीत्। अतः सः लौकिकविषयेषु अवधानं विना जीवनं अयापयत्। नित्यानित्यवस्तूनां ज्ञानेच्छया सः ऋषिमुनिसकाशात् ब्रह्मणः ज्ञानम् अर्जितवान्।

महाशालशौनकः –

मुण्डकोपनिषदि महाशालशौनक-अङ्गिरसयोः मध्ये ब्रह्मविषये कथोपकथनं दृश्यते। तत्र शौनकः पृष्टवान् केन ज्ञानेन सर्वं ज्ञानं ज्ञातुं शक्यते? प्रत्युत्तरे आङ्गिरस द्वयोः प्रकारयोः ज्ञानस्य विषये कथयति। एकं पराविद्या अपरञ्च अपराविद्या इति। यदा अपराविद्या दूरीभूता भवति तदा

पराविद्यायाः ज्ञानं प्राप्यते। अतः अङ्गिरसः महाशलशौनकाय अपरविद्यासम्बन्धीयं ज्ञानं अवदत् ततः पराविद्यायाः ज्ञानं दत्तवान्। शौनकः अपि अपरविद्यां ज्ञात्वा परविद्यायाः अथवा ब्रह्मणः ज्ञानं प्राप्तवान्।

नचिकेता-

कथापनिषदि नचिकेतसः उपाख्यानम् अस्ति। तत्र नचिकेता यमराजात् ब्रह्मज्ञानं प्राप्तुं दृढनिश्चयः जातः। यमराजेन प्रदत्तेसु त्रिषु वरदानेषु आत्मज्ञानं अन्तिमम् आसीत्। नचिकेता यमराजात् आत्मज्ञानं ज्ञात्वा मुक्तिमार्गे अगच्छत्। अतः उच्यते-

आत्मानं रथिनं विद्धि शरीरं रथमेव तु।

बुद्धिं सारथिं विद्धि मनः प्रग्रहमेव च।।[14]

भगवान् रामकृष्णः

गार्हस्थ्याश्रमः भारतीयसमाजस्य मेरुदण्डः अस्ति। चतुराश्रमेषु शेषत्रयं आश्रमः अस्मिन् आश्रमे आश्रितम् अस्ति। अस्मिन् विषये गार्हस्थ्याश्रमस्य महत्त्वम् अस्ति। चतुर्णां आश्रमानां प्रभावः श्रीरामकृष्णस्य जीवने दृश्यते। मातृज्ञानेन सपत्नया सह गृहे आसीत्। गृहे अपि सः जनेभ्यः अस्मात् संसारात् मुक्तिविषये उपदिष्टवान्। स अवदत् –

संसारे थाको शुधुमात्र ठाकुर सेवार जन्य।

एक हाते ईश्वरके डाको आरेक हाते कर्म करो ।। इति ।

अपि च –

[14]कठो. मन्त्र-३

ईश्वरके व्याकुल हये डाकले ताँर दर्शन हय, ताँर सङ्गे आलाप हय, येमन आमि तोमादेर सङ्गे कथा वलछि। सत्य वलछि दर्शन हय।

विवेकानन्दः –

भारतीयाध्यात्मवादस्येतिहासे स्वामिविवेकानन्दः युगपुरुषः आसीत्। तस्य व्यक्तित्वं, मननशीलता, युक्तियुक्तचिन्तनं, आध्यात्मिकचिन्तनं च सकलमानवानां पक्षे प्रेरणा अस्ति। तस्य ज्ञानयोगस्य, भक्तियोगस्य, राजयोगस्य, कर्मयोगस्य च माध्यमेन वयं परमज्ञानस्य तथा ब्रह्मज्ञानस्य सन्धानं आप्नुमः। तेन अवदत् -

जीवेर समस्त कर्मफल यदि ईश्वरके समर्पन करे जीव अनासक्तभावे कर्म करे ताहले जीवके आर वन्धन दशार मध्ये आवद्ध हते हय ना।

पञ्चमोऽध्यायः-

मुक्तिविषयकाः समीक्षा-

मुक्तेः अधिकारी-

मुक्तेः अधिकारः यः केनापि अस्ति। व्यक्तिमात्रनैव मोक्षलाभस्य समर्थाः अस्ति। यः कश्चित् मुक्तेः भवितुम् इच्छति तस्य मुक्तिः भविष्यति। परन्तु सर्वकारस्य कानिचन कार्यं कर्तव्यम् अस्ति। वेदान्तसारे कथयति –

अधिकारी तु विधिवत् अधीतवेदवेदाङ्गत्वेन आपाततः अधिगत-अखिल-वेदार्थः अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्य-नैमित्तिक-प्रायश्चित्त-उपासना अनुष्ठानेन- निर्गत-निखिल-कलष्मतया नितान्त-निर्मल-स्वान्तःसाधनचतुष्टयसम्पन्नः प्रमाता ।[15]

[15]वेदान्तसारः

मोक्षहेतुः ग्रन्थाः –

आध्यात्मिकमार्गः एव मोक्षमार्गः । तत्र मार्गनिर्देशकशास्त्राणि दर्शनशास्त्र-श्रीमद्भगवत्गीता-वेदान्त- उपनिषद् रामकृष्णस्य अमृतकथा- स्वामिविवेकानन्दस्य वाणी ओ रचना इत्यादिना सन्ति।

उपसंहारः-

प्राचीनकालतः अद्यावधिः संसारः परिवारः वा इष्टसाधने वाधा इति मन्यते पण्डितैः। परन्तु श्रीश्रीरामकृष्णदेवेन संसारावद्धानां जीवानां हि मुक्तिमार्गः निर्दिष्टः स्वीयकर्मानुसारेण। असौ रामकृष्णदेवः गृही सपत्नीकश्च आसीत्। तथापि संसारे स्थित्वापि तेन ईश्वरसेवायाः उत्कर्षः मार्गः प्रदर्शितः। तत्तु जीवसेवामाध्यमेन शिवस्य तथा परमेश्वरस्य सेवा। इदानीन्तने आधुनिकसमाजेऽपि धनिदरिद्रयोः विभेदः वर्णगतवैषम्यं विभिन्नाः समस्याश्च परिलक्ष्यन्ते। सर्वे जीवाः समानाः जीवात्मा एव इति ते विस्मृतवन्तः। स्वीयभोगाय अपरात्मानां दुःखकारणं ते भवन्ति। अनेन न तस्य हि कर्मफलं तं बध्नाति इति ते न चिन्तयन्ति। उच्यते नाटके अस्मिन्

दुःखभाजनमवज्ञाय न सुखी सुखभागभवेत्।

तज्जीवनं भवेद् दग्धं दीर्घश्वासेन दुखिनः ।।

अपि च संसाराबद्धाः मनुष्याः इमं संसारं हि बन्धनकारणमिति मन्यन्ते। परन्तु संसारे स्थित्वापि मुक्तिः सम्भवति इति तत्त्वं श्रीश्रीरामकृष्णदेवेन प्रचारितम्।

सन्न्यासी चानया रीत्या विनिः क्षिप्य गृहीणं गृहे।

निर्जनं वनमासाद्य कथं शान्तिं प्रपत्स्यते ।।इति

नाटकेऽस्मिन् दृश्यते श्रीरामकृष्णदेवेन श्रीसारदामणिदेव्या सह महासाधना आरभ्यते। सुदीर्घ चतुर्वत्सरं पित्रालये स्वामिनः गदाधरस्य अपेक्षायां कालं यापयित्वा सारदादेवी स्वपित्रा साकं दक्षिणेश्वरमागता। रामकृष्णः स्वीयसाधनापथे एषा वाधा भविष्यति इति चिन्तयित्वा तां पृच्छति

किं त्वया संसारे नेतुम् आगता? मातुः सारदामणेः उत्तरम् इष्टपथे ते सहायार्थम् आगताहम्। ततः परं माता सारदामणिः स्वामिनं जिज्ञासितवती अहं तव का भवामि । रामकृष्णदेवः उक्तवान् त्वं मे जगज्जननीव माता। ततः परं मातारं सारदां पूजितवान् सश्रद्धया "देवि! अर्चयामि त्वां देवीरूपां षोडशोपचारैः, त्वामुद्दिश्य भोगं निवेदयामि च।"[19] अनेन दिव्यदम्पतियुगलस्य आध्यात्मिकसंसारजीवनं प्रारभते। अपि च जीवमध्ये हि तेन महापुरुषेण शिवस्य अनुभवः कृतः। यत्तु सर्वदार्शनिकानां प्रतिपादितं तत्त्वम्, परन्तु अवतारवरिष्ठेन अतिव सहजतया तत्तत्त्वस्य प्रयोगः कृतः। उच्यते "जीवाः परमेश्वरस्य मूर्तप्रतिच्छविस्वरूपाः। ततः सर्वजीवे दया हि करणीया परमेश्वरकामिसाधकेन। किन्तु किन्तु किं मया कथितम् किं किम्? "जीवे दया" न न न अन्याय्यं मम वचनम्। न न जीवे दया। जीवे प्रेम, जीवे श्रद्धा, जीवे सेवा। जीवः स्वयं परमेश्वरः, को वा कीटानुकीटोऽहं तस्मै दयाप्रदर्शनाय? शिवज्ञानेन जीवपूजा करणीया एतदेव सकलागमानुसारम् एतदेव सकलदर्शनशास्त्रमाहात्म्यम्, एतदेव सकलधर्मतन्त्रमाधुर्यम्, एतदेव

सकलनीतितत्त्वमाङ्गल्यञ्च ।"[20] आजीवनं तेन महापुरुषेण जीवानां सेवा एव कृता। तस्य देहान्तात् परं तस्य पत्नी माता सारदा शिष्याश्च तत्प्रदर्शितं मार्गं हि गृहीतवन्तः। अद्यावधिः तत्परम्परा अनुसृता वर्तते। शोधप्रबन्धेऽस्मिन् श्रीश्रीरामकृष्णदेवेन प्रदर्शितस्य आध्यात्मिकतत्त्वस्य आलोचनया प्राचीनकालतः अद्यावधिः परमेश्वरस्य प्राप्तेरुपायः सहजतया वर्णितो वर्तते। वस्तुतः अस्य जगतः सर्वेषु वस्तुषु भक्तिभावं श्रद्धा वा करणीया। भोज्य-भोजकसम्बन्धातिरिक्तं हिंसा न करणीया। ईश्वरे भक्तिः जीवे च सेवा हि अस्माकं परमं कर्मः श्रेष्ठः धर्मश्च। अतः तस्मात् न भ्रष्टाः भवेयुः। उच्यते तैत्तिरियोपनिषदि "सत्यान्न प्रमदितव्यम्, धर्मान्न प्रमदितव्यम्, कुशलान्न प्रमदितव्यम्, भूतैर्न प्रमदितव्यम्।" येन आचरणेन हि दुःखार्णवे पतितानां संसारावद्धानां जीवनाम् मुक्तिर्सम्भवतीति शम्।

ग्रन्थसूची-

अमृतकथा। सम्पा. स्वामिभूतेशानन्दः। कोलकाता। चतुर्दशसंस्करणम्। २०१८

ईश्वरकृष्णः। सांख्यकारिका। सम्पा. श्रीपूर्णेन्दुवेदान्तचुञ्चु । कोलकाता। पश्चिमबङ्ग राज्य पुस्तक पर्षद् द्वितीय संस्करणम् । २००७

ईशोपनिषद्। सम्पा. श्रीअशोककुमारवन्द्योपाध्यायः। कोलकाता। प्रथमसंस्करणम्। २००६

ईशोपनिषद्। सम्पा. श्रीयदुपतित्रिपाठी। कोलकाता। वि.एन्.पावलिशार्स। प्रथमप्रकाशः। २०२१

उपनिषद्। गोरक्षपुरः। गीताप्रेस।

केनोपनिषद् स्वामिजुष्टानन्दः। कोलकाता। द्वितीयसंस्करणम्।

व्यासदेवाचार्यः। श्रीमद्भागवत्गीता। सम्पा. गीताशास्त्री जगदीशचन्द्रघोषः। कोलकाता। उद्बोधनकार्यालयः। द्वितीय संस्करणम्।

व्यासदेवाचार्यः। श्रीमद्भागवत्गीता। सम्पा. स्वामिजगदीश्वरानन्दः। नवमसंस्करणम्। २०१९

व्यासदेवाचार्यः। श्रीमद्भागवत्गीता। सम्पा. स्वामिजगदीश्वरानन्दः।

भारतीयदर्शन। सम्पा. ड. समरेन्द्रभट्टाचार्यः। कोलकाता। संस्कृतवुकडिपो। चतुर्थसंस्करणम्। २०१८

युगनायकविवेकानन्दः। सम्पा, स्वामिगम्भीरानन्दः।

श्रीरामकृष्णजीवनी। सम्पा. स्वामितेजसानन्दः। कोलकाता। २००९

सदानन्दयोगीन्द्रः। वेदान्तसारः। सम्पा. ड. कृष्णधीवरः। संस्कृतवुकडिपो। प्रथमप्रकाशः। २०२१

सदानन्दयोगीन्द्रः। वेदान्तसारः। सम्पा. विपदभञ्जनपालः। संस्कृतपुस्तकभाण्डारः। अष्टमसंस्करणम्। १४२०

सम्भाव्याध्यायविभाजनम्-

भूमिका-

१. प्रथमोऽध्यायः- उपनिषदां परिचयज्ञापनम्।

१.१. उपनिषदां उद्भव विकाश्च

१.२. ईश्वरस्य स्वरूपः

१.३. ब्रह्मस्य स्वरूपः

२. द्वितीयोऽध्यायः - मुक्तिविषयकपर्यालोचना-

२.१. वेदान्तदर्शने पर्यालोचना

२.२. ब्रह्मसूत्रे पर्यालोचना

२.३.गीतायां पर्यालोचना

२.४.दर्शने पर्यालोचना

- बौद्धदर्शने मुक्तिः
- सांख्ययोगदर्शने मुक्तिः
- न्यायवौशेषिकदर्शने मुक्तिः
- मीमांसादर्शने मुक्तिः
- वेदान्ते मुक्तिः

३. तृतीयोऽध्यायः- उपनिषत्सु वर्णिताः मुक्तिविषयकधारणाः।

३.१. ईशोपनिषदि मुक्तिविषयकधारणा

३.२. केनोपनिषदि मुक्तिविषयकधारणा

३.३. कठोपनिषदि मुक्तिविषयकधारणा

३.४. प्रश्नोपनिषदि मुक्तिविषयकधारणा

३.५ .मुण्डकोपनिषदि मुक्तिविषयकधारणा

३.६ श्वेताश्वतरोपनिषदि मुक्तिविषयकधारणा

३.७. वृहदारण्यकोपनिषदि मुक्तिविषयकधारणा

४. चतुर्थोऽध्यायः – गृहस्थानां मुक्तेरुपायवर्णना-

अस्माकं शास्त्रादौ जीवनमुक्तानां बहूगृहस्थानां नामानि श्रयन्ते।

४.१. मुमुक्षराजाजनकः

४.२. महाशालशौनकः

४.३. नचिकेता

४.४. भगवान् रामकृष्णः

४.५. स्वामिविवेकानन्दः

५.पञ्चमोऽध्यायः- मुक्तिविषयकाः समीक्षा

५.१. मुक्त्याः अधिकारी।

५.२. मुक्तिविषयकाः ग्रन्थाः।

उपसंहारः